# इको गुणवृद्धी इति सूत्रार्थविचार:

ड. स्वर्णलता पण्डा

इदं पाणिनीयाष्टाध्यायीग्रन्थस्य प्रथमाध्यायस्य प्रथमपादस्य तृतीयसूत्रम्। इदं परिभाषासूत्रं वर्त्तते। एतत् च स्वयं किमपि कार्य्यं न करोति। अपितु विधिसूत्रेण सह प्रवर्त्तते। एतत् सूत्रं सूत्रान्तरै: साकं संयुज्य वाक्यार्थं निरूपयति। सूत्रार्थम् उपकरोति,नियमयति च। अतएव उच्यते-“[१]अनियमे नियमकारिणी परिभाषा’’ इति।

ननु षड् विधेषु सूत्रष्विदं किम्भूतं सूत्रमिति जिज्ञासायां परिभाषेयं व्याख्यानात् इति नागेश:। परिभाषेयं स्थानिनि समर्था इति काशिका। अनियमे प्रसंगे नियमो विधीयते। वृद्धिगुणौ स्वसंज्ञया शिष्यमाणवक: एव स्थाने वेदितव्यौ इति।

ननु गुणवृद्धि इति द्वन्द्वे वृद्धिशब्दस्य पूर्वनिपाते “वृद्धिगुणौ’’ इति स्यात्। न तु गुणवृद्धौ स्यादिति चेन्न राजदन्तादित्वेन अदोषात्।

ननु सूत्रे सकृदेव गुणवृद्धसुच्चारणे वृत्तौ दीक्षितस्य गुणवृद्धिशब्दभ्यां यत्र गुणवृद्धी विधीयेते तत्रेक: इति षष्ठ्यन्तं पदमुपतिष्ठते इतिवाक्यद्वयस्योच्चारणमसङ्गतमिति चेत्।अत्र “[२]वृद्धिरादैच्’’ “[३]अदेङ्गुण:’’ इत्यतो वृद्धिपदानुवृत्त्या अदेङ् वृद्धिसंज्ञाऽपि स्यादिति वाच्यम्। निरवकाशतया गुणसंज्ञया वृद्धिसंज्ञाया बाधात्। वृद्धिरादैच् इत सम्पूर्णसूत्रानुवृत्त्या अदेङ् गुणसंज्ञया अप्राप्तिश्च। तत्र च अनुवृत्तिवैयर्थ्यम्। धाराप्रवाहेणोत्तरत्रानु-वृत्त्यर्थ तच्चारिताथ्र्यत्। तथा च अनुवृत्त गुणवृद्धिग्रहणलाभे सूत्रस्थगुणवृद्धिग्रहणं व्यर्थम्। व्यर्थीभूय गुणपदस्य अदेङ् निष्ठविधेयताप्रयोजकगुणपदे वृद्धिपदस्य आदैज्निष्ठविधेयताप्रयोजकवृद्धिपदे लक्षणां ग्राहयति। तेन सूत्रार्थो इत्थं भवति गुणवृद्धीप्रयोजकवृद्धिपदे लक्षणां ग्राहयति। तेन सूत्रार्थो इत्थं भवति गुणवृद्धीशब्दभ्यां यत्र गुणद्धिशब्दाभ्यामित्यत्र ल्यब्लोपे पञ्चमी। तथा च गुणपदमुच्चार्य यत्र गुणो विधीयते तत्र वृद्धिशब्दमुच्चार्य यत्र वृद्धि र्वा विधीयते तत्र च इक: इति षष्ठयन्तं पदमुपतिष्ठते संगच्छते संम्भवतीति यावत्।

**प्रवृतिस्थलविचार:**

इत्थं सूत्रार्थकरणे गुणवृद्धिविधायके सूत्रे नास्या: प्रवृत्ति: तत्र विधेयता गुणवृद्धिसंज्ञानिष्ठत्वात्। न तु अदेङ् आदैच् निष्ठविधेयता। उपर्युक्त सूत्रे विधेयतानिवेशात् यत्र अदेङ् आदैजादौ विधेयता स्यात् तत्र सूत्रस्यास्य प्रवृत्ति: तेन "[४]अतो गुणो'' [५]वृद्धिर्यस्याचामादे:'' इत्यत्र गुणवृद्धिपदसत्वेऽपि अस्य सूत्रस्याप्रवृत्ति: अत्र गुणवृद्धिपदमुद्देश्यकोटौ प्रविष्टम्। न तु विधेयकोटौ '[६]त्यदादीनाम:' '[७]पथिमथ्यृ' इत्यत्र यदापि गुणवृद्धी विधीयेते तथा गुणवृद्ध्यो: उच्चारणाभावेन अस्य सूत्रस्याप्रवृत्ति:।

**संज्ञासंज्ञिविषयनिर्णय:**

ननु "[८]इकोगुणवृद्धी'' इत्यत्र यत् गुणवृद्धीपदं तत् अर्थपरकम्। "अदेङ् गुण:'' "वृद्धिरादैच्‌ इत्यत: अनुवर्त्तमानं गुणवृद्धिपदस्वरूपपरकत्वेन तत: आगत: संज्ञाबोधकं पदमत्र संबोधकत्वेन ग्रहणे मानाभाव:। यतो हि न हि सर्पन्ति गोधा: सर्पणादहिर्भवति इतिन्यायदिति। अत: गुणवृद्धिग्रहणानुवृत्ते कार्यसिद्धे पुन: गुणवृद्धिग्रहणसामर्थ्यात् उपयुक्तार्थ असंगत इति चेन्न। अनुवर्त्तमानञ्च संज्ञपादमेत स्यात् संज्ञाकरणेनान्यत्र संज्ञिपरत्वात्। अर्थात् अनुवर्त्तमानं गुणवृद्धिपदमत्र संज्ञिपरकं स्यात् न तु संज्ञापरत्वात्। अर्थात् अनुवर्त्तमानं गुणवृद्धिपदमत्र संज्ञिरकं स्यात् न तु संज्ञापरकम्। यत: संज्ञाशास्त्रात् संज्ञाबोधकपदमनुवर्त्तते तद्विधेयात् भिन्नविधेयकशास्त्रेऽनुवृत्तसंज्ञाबोधकपदस्य संज्ञिपरकत्वमिति नियम:। अर्थात् यस्मात् संज्ञाविधायकसूत्रात् संज्ञावाचकपदमन्यत्र अनुवर्तते। तत्र सूत्रं यदि संज्ञाविधायकसूत्रीयविधेयतावच्छेदकात् इतररूपावचच्छिन्नविधेयताकं भवति तर्हि संज्ञाबोकं पदं संज्ञिबोधकत्वेन गृह्यते। यथा-"[९]बहुगणवतु-‌ इति सूत्रेण संख्यासंज्ञा विधीयते। तस्मात् "[१०]ष्णान्ता षट्'' इति सूत्रं संख्या इति संज्ञावाचकपदस्यानुवर्त्तते।

"ष्णान्ता षट्‌ संज्ञासंज्ञाभिन्नषट्संज्ञा विधत्ते। अत: संज्ञा विधायकसूत्रीयविधेयतावच्छेदकात् इतर रूपावच्छिन्नविधेयकत्वात्,अत्रतेरसंख्या पदं न स्वरूपपरं,परन्तु पञ्चन्,षट् इत्यादि प्रसिद्धसंख्या बोधकम्। तेन अर्थपरं सज्ञिपरं वा, अपरञ्च "ष्णान्ता षट्'' इति सूत्रे यदि संख्यापदं स्वरूपं परकं स्यात् तर्हि "ष्णान्ता " इत्यनेन अन्वय: न स्यात्। संख्यापदे तदन्तत्वाभावात्। अत: अत्र संख्यापदमर्थपरकम्।

**गुणवृद्धिपदविचार:**

यत्र गुणवृद्धि-विधायकसूत्रेषु प्रत्यक्षत: परोक्षत: वा स्थानी न दृश्यते तत्र एतत् सूत्रम् उपस्थाय व्यवस्थां करोति त्यत् ,विधीयमानम् गुणकार्यं वृद्धिकार्य्यं वा इक्वर्णस्य स्थाने एव स्यात् नान्यत्र।

यत्र यत्र गुणशव्दं वृद्धिशव्दं वा उच्चार्य गुण: वृद्धि: वा विधीयते तत्र एव इयं परिभाषा उपतिष्ठते। प्रसङ्गेऽस्मिन् उदाहरणानि-

१. [११]मिदेर्गुण:

२. [१२]सार्वधातुकार्धधातुकयो:।

३. [१३]पुगन्तलघूपधस्य च।

४. [१४]मृजेर्वृद्धि: इत्यादि-

"मिदेर्गुण:ह्ल इति सूत्रे गुणादेश-विधानप्रसङ्गे कुत्र गुणादेश: स्यात् एतस्य स्पष्टनिर्देशो नास्ति। मिद्धातौ त्रय: र्वर्णा: विद्यन्ते-म,इ,द् इति। अत्र शङ्का जायते कस्य वर्णस्य स्थाने गुण: स्यत्। अस्याम् अवस्थायाम् "इकोगुणवृद्धीह्ल इति एतत्परिभाषासूत्रम् उपस्थाय इमां व्यवस्थां करोति- "इक्वर्णस्य एव स्थाने गुण: स्यत्ह्ल। अतएव मिद्धातौ इकारस्य इक् वर्णत्वात् तत्रैव गुणादेशविधानात् "मिद्यतेह्ल इत्यादि सिध्यति। एवञ्च "मृजेर्वृद्धि:ह्ल इति सूत्रे वृद्ध्यादेश: स्यात्। इति एतस्य स्पष्ट-निर्देश: नास्ति। मृज् धातौ त्रय:वर्णा: विद्यन्ते-म,ऋ,ज् इति। अत्र शंका जायते कस्य वर्णस्य स्थाने वृद्धि: स्यात्। अस्याम् अवस्थायाम् इकोगुणवृद्धी इति एतत् परिभाषासूत्रम् उपस्थाय इमां व्यवस्थां करोति-"इक्ह्लवर्णस्य एव स्थाने वृद्धि: स्यात्। अतएव मृज् धातौ ऋकारस्य इक्वर्णत्वात् तत्रैव वृद्ध्यादेशविधानात् "मार्ष्टिह्ल इत्यादि सिध्यति।

परन्तु यत्र यत्र गुणशव्दं वृद्धिशव्दं च साक्षात् अनुच्चार्य गुणसंज्ञकानां वृद्धिसंज्ञकानां च वर्णानाम् आदेश: विधीयते तत्र इयं परिभाषा नोपतिष्ठते। तद् यथा-

१. [१५]त्यदादीनाम:।

२. [१६]पथिमथ्युभुक्षामात्।

३. [१७]दिव औत्।

त्यदादीनाम: इति सूत्रेण अकाररूप: आदेश: विधीयते। असौ अकार: गुणसंज्ञको भवति। अत्र साक्षात् स्थानिनिर्देश: नास्ति। तथा गुणसंज्ञको भवति। अत्र साक्षात् स्थानिनिर्देश: नास्ति। तथा गुणादेश: स्यात् इति इत्थं निर्देशोऽपि न कृत:। अत: अत्र इक्परिभाषाया: अनुपस्थित्या अकारादेश: इक्वर्णस्य स्थाने न विधीयते। परन्तु आकारस्य स्थाने गुणादेशो न भवति।

एवञ्च व्यञ्जनवर्णस्य स्थाने गुणादेश: न विधीयते। "[१८]सप्तम्यां जेनेर्ड:'' इत्यत्र विधीयमानस्य डस्य डित् करणम् ज्ञापकम् भवति। तद्यथा-"मन्दुराज:'' इत्यत्र "मन्दुर'' पूर्वकात् जन् धातो: "[१९]सप्तम्यां जनेर्ड:'' इति सूत्रेण डप्रत्यय कृते "मन्दुर-जन् + अ'' इति स्थिते अत्र डित्त्वात्

“टे:[20]ठ इति सूत्रेण टे: अन्भागस्य लोपे मन्दुर - ज् + अ इति मिलित्वा विभक्तिकार्ये “मन्दुरराज:’’ इति रूपं जायते।

यद्यत्र व्यञ्जनवर्णस्य नकारस्य गुण रूपेण अकारादेश: स्यात् तर्हि डप्रत्ययं विहाय डस्य स्थाने अवर्णस्य विधानेन “मन्दुर-ज + अ + अ’’ इति स्थिते “अतोगुणे’’ इति सूत्रेण पररूप कार्य्येण “मन्दुरज:’’ इति रूपस्य सिद्धौ “सप्तम्यां जनेर्ड:’’ इति सूत्रे डप्रत्ययविधानस्य डित् करणं व्यर्थीभूय ज्ञापयति यत् व्यञ्जनवर्णस्य स्थाने गुणादेश: न स्यात्। अतएव डित्करण सामर्थ्याद् टे: अन्भागस्य लोपसम्भवात् “मन्दुरज:’’ इत इष्टरुपस्य सिद्धौ न कापि क्षति:।

एवञ्च विधानसामर्थ्यात् -ए,ओ,ऐ,औ इत्यत्र सन्ध्यक्षरेषु गुणादेशो न विधीयते। तद् यथा ग्लायति इत्यत्र ग्लै धातो: “लटो-तिपि-शपि ग्लै-अ-ति’’ “[21]अलोऽन्त्यस्य’’ इति परिभाषया त्यद्शब्दस्य अन्त्यस्य दकारस्य स्थाने विधानात् “स्य:’’ इत्यादि सिध्यति।

एवञ्च “दिवऔत्’’ इति सूत्रेण औकाररूप: आदेश: विधीयते। असौ औकार: वृद्धिसंज्ञको भवति। अत्र साक्षात् स्थानिनिर्देश: नास्ति। तथा वृद्ध्यादेश: स्यात् इति इत्थम् निर्देशोपि न कृत:। अत: अत्र इक् परिभाषाया: अनुपस्थित्या औकारादेश: इक्वर्णस्य स्थाने न विधीयते। परन्तु “अलोऽन्त्यस्य’’ इति परिभाषया “दिव्’’शव्दस्य अन्त्यस्य वकारस्य स्थाने विधानात् “द्यौ’’ इत्यादि सिध्यति।

एवञ्च “[22]पथिमथ्युभुक्षमात्’’ इति सूत्रेण आकाररूप: आदेश: विधीयते। असौ आकार: वृद्धिसंज्ञक: भवति। अत्र साक्षात् स्थानिनिर्देशो नास्ति। यथावृद्धादेश: स्यात् इति इत्थम् निर्द्देशोपि न कृत:। अत: अत्र इक् परिभाषाया अनुपस्थित्याकारादेश: इक्वर्णस्य स्थाने न विधीयते। परन्तु “अलोऽन्त्यस्य’’ इति परिभाषाया “पथिन्’’ शव्दस्य अन्त्यस्य नकारस्य स्थाने विधानात् “पन्था:’’ इत्यादि सिध्यति।

इकोगुणवृद्धी इति सूत्रे इक: इति पदग्रहणसामर्थ्यात् इक्-वर्णस्य एव स्थाने गुण: वृद्धि: आच स्यात् परन्तु आ,ए,औ तथा व्यञ्जनवर्णानाम् स्थाने न स्यात्। तथासति “याता’’ इत्यत्र “[23]सार्वधातुकार्धधातुकयो:’’ इति सूत्रेण या इत्यत्र स्थिते ऐकारस्य आयादेशे “ग्लायति’’ इति रूपं सिध्यति। ग्लौ-अ-ति इत्यत्र न स्यात् तर्हि सूत्रे इक: इति पदस्य ग्रहणं न स्यत् तर्हि: स्थानकृतेन आन्तर्य्येण ऐकारस्य अयादेशे ग्लायति इति उद्दिष्टं रूपम् आपद्यते। अतएव सन्ध्यक्षरेषु गुणवृद्धयो: वारणार्थम् “इकोगुणवृद्धी’’ इति सूत्रे इक इति पदग्रहणं सार्थक्यं भजते।

**सन्दर्भटिप्पणी-**

१.प.शे.दु.व्या.पृ.५.ओ

२.पा.सू.१/१/१

३.पा.सू.१/१/२

४.पा.सू.६/१/९७

५.पा.सू.१/४/७३

६.पा.सू.७/२/१०२

७.पा.सू.७/१/८५

८.पा.सू.१/१/३

९.पा.सु.१/१/२३

१०.पा.सु.१/१/२४

११.पा.सू.७/३/८२

१२.पा.सू.७/३/८४

१३.पा.सू.७/३/८६

१४.पा.सू.७/२/११४

१५.पा.सू.७/२/१०२

१६.पा.सू.७/१/८५

१७.पा.सू.७/१/८४

१८.पा.सू.३/२/९७

१९.पा.सू.३/२/९७

२०.पा.सू.६/४/१४३

२१.पा.सू.१/१/५२

२२.पा.सू.७/१/८५

२३.पा.सू.७/३/८४

**सहायकग्रन्थाः**


१. वैयाकरणसिद्धान्तकौमुदी,व्याख्याकार:पं. वमचन्द्र झा, चौखम्बा कृष्णदास संस्कृत अकादमी, वाराणसी-२२१००१,२००९।

२. अष्टाध्यायीसूत्रपाठ:,दीक्षितपुष्पा, संस्कृतभारती, नवदेहली, २०१०।

३. अष्टाध्यायीसूत्रपाठ:,मिश्रनारायण:,चौखम्बा ओरियन्टालिया, वाराणसी, १९७७।

४. लघुशब्देन्दुशेखर:, मिश्रविश्वनाथ:, पञ्चसन्ध्यन्त:, चौखम्बा संस्कृत प्रतिष्ठान, दिल्ली १९९८।

५. लघुशब्देन्दुशेखर:, शास्त्रीवैकुण्ठनाथ:,अव्ययीभावान्त:, चौखम्बा सुरभारती प्रकाशन, १९९४।

६. वैयाकरणसिद्धान्तकौमुदी, प्रथमभाग:, बालमनोरमा-तत्त्वबोधिनीटीका, मोतिलाल बनारसीदास, दिल्ली, २००५।

७. वैयाकरणमहाभाष्यम्, डा: आचार्यसुद्युम्न:, रामलाल कपूर ट्रष्ट, रेवलि, सोनीपत,२००८।

८. वैयाकरणमहाभाष्यम्, मीमांसकयुधिष्ठिर:, रामलाल कपूर ट्रष्ट, रेवलि, सोनीपत,२००८।

९. परिभाषेन्दुशेखर:, मिश्रविश्वनाथ:, चौखम्बा सुरभारती प्रकाशन, वाराणसी,२००५।

१०. अष्टाध्यायीसूत्रपाठ:, प्रह्लादटिप्पणीसहित:, सम्पादक:- पं. सत्यनारायणशास्त्री खण्डुडी, कृष्णदास संस्कृत सीरीज ६५, कृष्णदास संस्कृत अकादमी, वाराणसी-२२१००१, १९८५।

११. महाभाष्यम्,(नवाह्निकम्), सम्पादक:- चारुदेव शास्त्री, मोतिलाल बनारसीदास, दिल्ली, १९६८।

१२. वाक्यपदीयम्, ब्रह्मकाण्डम्- श्री वामदेव आचार्य:, चौखम्बा कृष्णदास संस्कृत अकादमी, वाराणसी-२२१००१,१९८७।